नं. ५१४६

यजुर्वेदस्य चमकसूक्तं

पत्र. ४ ———————

संहिता ब्राह्मणं

चमकः यजुः संहितायाम्

५१४७

5147

F. = 4/2

॥श्रीगणेशाय नमः॥ अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः॥ द्युम्नैर्वाजेभिरागतं॥ वाजश्च
मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च
मे ज्योतिश्च मे सुवश्च मे प्राणश्च मे पानश्च मे व्यानश्च मे सुश्च मे चित्तं च म आधीतं च मे
वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च
मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेंगानि च मे स्थानि च मे परूंषि च मे श
रीराणि च मे॥१॥ ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेमश्च मेंभश्च मे जेमा
च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे
श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमा

॥ ३ ॥ णं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च
म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥ २ ॥ शं च मे मयश्च मे प्रियं च मे नुका
मश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे
द्रविणं च मे यंता च मे धर्त्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञा
त्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मे मृतं च मे यक्ष्मं च मे नामयच्च
मे जीवातुश्च मे दीर्घायुत्वं च मे नमित्रं च मे भयं च मे सुगं च मे शयनं च मे सूषा च मे सु
दिनं च मे ॥ ३ ॥ ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे स राम
पीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे ॥ ३ ॥

पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मे क्षितिश्च मे कूयं
वाश्च मेऽन्नं च मे क्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वा
श्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥
॥४॥ अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिर
ण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म
ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च मे यज्ञेन कल्पन्तां
वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च
म एमश्च म इतिश्च मे गतिश्च मे ॥५॥ अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता

च म इंद्रश्च मे सरस्वती च म इंद्रश्च मे पूषा च मे इंद्रश्च मे बृहस्पतिश्च म इंद्रश्च मे मित्रश्च म
इंद्रश्च मे वरुणश्च म इंद्रश्च मे त्वष्टा च मे इंद्रश्च मे धाता च म इंद्रश्च मे विष्णुश्च म इंद्रश्च
मे श्विनौ च म इंद्रश्च मे मरुतश्च म इंद्रश्च मे विश्वे च मे देवा इंद्रश्च मे पृथिवी च म इंद्रश्च
मेंतरिक्षं च म इंद्रश्च मे द्यौश्च म इंद्रश्च मे दिशश्च म इंद्रश्च मे मूर्द्धा च म इंद्रश्च मे प्रजा
पतिश्च म इंद्रश्च मे ॥६॥ अंशुश्च मे रश्मिश्च मे दाभ्यश्च मे धिपतिश्च म उपांशुश्च मे
तर्यामश्च म ऐंद्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्र
श्च मे मंथी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च
मेतिग्राह्याश्च म ऐंद्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेंद्रश्च म आदि

स्रुश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥७॥
इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च
म उपरवाश्च मे धिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च मे आधवनीयश्च
म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मे वभृथश्च मे
स्वगाकारश्च मे ॥८॥ अग्निश्च मे घर्मश्च मे र्कश्च मे सूर्यश्च मे प्राणश्च मे श्वमेधश्च मे पृथि
वी च मे दितिश्च मे दितिश्च मे द्यौश्च मे शक्करीरंगुलयो दिशश्च मे यज्ञेन कल्पंतामृक्च मे
साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मे होरात्रयोर्वृष्ट्या बृ

हृद्यंतुरे च मे यज्ञेन कल्पन्तां ॥८॥ गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट्
च मे दित्यौही च मे पंचाविश्च मे पंचावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तु
र्यौही च मे पष्ठवाच्च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मे नड्वांश्च
मे धेनुश्च म आयुर्यज्ञेन कल्पन्तां प्राणो यज्ञेन कल्पताम् अपानो यज्ञेन कल्पतां व्यानो य
ज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्य
ज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतां ॥१०॥ एका च मे तिस्रश्च
मे पंच च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पंचदश च मे सप्तदश च

॥४॥ मे नव च मे दश च म एकविंशतिश्च मे त्रयोविंशतिश्च मे पंचविंशतिश्च मे सप्त
विंशतिश्च मे नवविंशतिश्च म एकत्रिंशच्च मे त्रयस्त्रिंशच्च मे चतस्रश्च मेष्टौ
च मे द्वादश च मे षोडश च मे विंशतिश्च मे चतुर्विंशतिश्च मेष्टाविंशतिश्च मे द्वा
त्रिंशच्च मे षट्त्रिंशच्च मे चत्वारिंशच्च मे चतुश्चत्वारिंशच्च मेष्टाचत्वारिं
शच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्द्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौ
वनश्च भुवनश्चाधिपतिश्च ॥११॥ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शं
सिषद्विश्वे देवाः सूक्तवाचः पृथिवी मातर्मा मा हिंसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्या
मि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अ
वन्तु शोभायै पितरोनुमदंतु ॥ ॥इति चमकं समाप्तः॥ ॥छ॥ ॥अत्रि मयाभद्राची पोथी ॥४॥

श्री १

वैद्यचामत्कृ ५